ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा प्रस्तावितः

# वार्षिकः संस्कृतसम्भाषणप्रशिक्षणपाठ्यक्रमः

# (डिप्लोमा कोर्स)

## संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी




* समन्वयकः *

डॉ. रविशंकर पाण्डेयः

सह - समन्वयकः

1. डॉ. राजा पाठकः
2. डॉ. मधुसूदन मिश्रः

# उद्देश्यम्

सर्वत्र संस्कृतम्, सर्वेषां मुखे संस्कृतमिति ध्येयवाक्यस्य क्रियान्वयनाय,- प्राच्यविद्यायाः प्रचारप्रसाराय, वसुधैवकुटुम्बकमिति भावनया बन्धुत्ववर्धनाय, संस्कृतभाषा-व्यापकरूपेण संवादभाषा भवेत्, अधिसंख्यजनाः संस्कृतसम्भाषणे दक्षाः भवेयुश्च आधुनिकयन्त्रसहयोगेन उत्तरप्रदेशशासन-निर्देशानुगुणं संस्कृतभाषादक्षप्रशिक्षकैः सुगमविधिना संपूर्णानन्दसंस्कृत-विश्वविद्यालयेन वार्षिकं संस्कृतभाषा-संस्कृतसम्भाषणपाठ्यक्रम-प्रशिक्षणं (डिप्लोमा कोर्स) संकल्पितम् अस्ति।

# पाठ्यक्रमसंरचना

**संस्कृतसम्भाषणशिक्षणपाठ्यक्रमे-**

**वार्षिकः डिम्लोमापाठ्यक्रमः सञ्चालितो भविष्यति । अशीत्यधिकं शतं होरात्मकः पाठ्यक्रमो विद्यते । अस्य पाठयक्रमस्य चत्वारि प्रश्नपत्राणि, प्रतिप्रश्नपत्रं शतम्(100), पूर्णाङ्काः, उत्तीर्णाङ्काः  षट्त्रिंशत् (36) निर्धारिताः सन्ति । सर्टिफिकेटपाठ्यक्रमापेक्षया डिप्लोमापाठ्यक्रमः विषयदृष्ट्या गरीयान् विद्यते |**

# प्रथमं प्रश्नपत्रम्

संस्कृतसंभाषणाय शब्दपरिचयः प्रथमं सोपानं विद्यते, अस्माकं व्यवहारे प्रचलितानां संज्ञाशब्दानां क्रियाशब्दानाम् अदन्तशब्दानाञ्च परिचयः पुनश्च तेषामभ्यासः भाषाकौशलाय कारणीयः | संज्ञाशब्देषु अदन्तशब्दानां परिचयः बोधाय सौकर्यं भवति, यथा -(रामः, बालकः, गजः, अश्वः, प्रभृतयः) | अनन्तरम् अजन्तशब्दानाम् अभ्यासं विधाय व्यवहारे प्रयुक्तानां क्रियापदानां (यथा - भवति,पठति,गच्छति,शेते,उपविशति,हसति) परिचयः प्रशिक्षकैः कारणीयः| संज्ञापदं, क्रियापदञ्च संयोज्य लघुवाक्यनिर्माणं कृत्वा प्रशिक्षुभिः सह चर्चा भाषाशिक्षणाय प्रशिक्षकैः विधेया | पञ्चचत्वारिंशत्होरात्मकः पाठनकालः |

| प्रथमं प्रश्नपत्रम् | पूर्णाङ्काः (100) | होरात्रयम् |
|---|---|---|

**विषयः-** | **पाठनकालांशः(पञ्चचत्वारिंशत्होरात्मकः)**

| | |
|---|---|
| 1. शब्दपरिचयः | (पञ्चविंशतिहोरात्मकः) |
| (क) संज्ञाशब्दपरिचयः | (दशहोरात्मकः) |
| अजन्तशब्दः | (पञ्चहोरात्मकः) |
| हलन्तशब्दः | (पञ्चहोरात्मकः) |
| (ख)क्रियाशब्दपरिचयः (दशगणीयप्रतिनिधिधातवः) | (पञ्चदशहोरात्मकः) |
| पुरुषानुगुणम् | (प्रतिधातु-एकहोरात्मकः) |
| वचनानुगुणम् | (प्रतिधातु- अर्धहोरात्मकः) |
| 2- विभक्तिप्रयोगपरिचयः | (विंशतिहोरात्मकः) |
| (क)प्रथमा द्वितीयातृतीयाविभक्तयः | (त्रिहोरात्मिका) |
| (ख)चतुर्थीपञ्चमीषष्ठीविभक्तयः | (त्रिहोरात्मिका) |
| (ग)सप्तमीविभक्तिः सम्बोधनञ्च | (त्रिहोरात्मिका) |
| 3- वाक्यनिर्माणम् | |
| (क) अजन्तशब्देन | (त्रिहोरात्मकम्) |
| (ख) हलन्तशब्देन | (त्रिहोरात्मकम्) |
| (ग)क्रियापदेन | (त्रिहोरात्मकम्) |
| (घ)विभक्तिपरिवर्तनेन | (द्विहोरात्मकम्) |

संदर्भग्रन्थाः-शब्दरूपावली,धातुरूपावली, लघुसिद्धान्तकौमुद्याः कारकप्रकरणं तिङन्तप्रकरणञ्च ।

# द्वितीयं प्रश्नपत्रम्

अस्य पाठ्यक्रमस्य द्वितीये प्रश्नपत्रे क्रियापदप्रयोग-अव्ययशब्दप्रयोग-संख्यावाचकशब्दप्रयोगपरिचयः प्रमुखरूपेण पाठ्यविन्दुः विद्यते । प्रथमपत्रे क्रियापदविषये चर्चा कृता विद्यते, अत्र क्रियापदप्रयोगः वाक्ये प्रशिक्षकैः शिक्षणीयः । वाक्यानां समाप्तिः क्रियया, तस्मात् अर्थसंपूर्तिश्च भवति । क्रियापदप्रयोगः कालपुरुषवचनानुगुणं वाक्यनिर्माणं विधाय पाठनीयः, परिवेशे प्रचलिताः परस्मैपदिनः आत्मनेपदिनश्च धातवः प्रयोक्तव्याः । वाक्यनिर्माणे वाच्यपरिवर्तनमपि प्रमुखं भवेत् ।

**द्वितीयं प्रश्नपत्रम्** **पूर्णाङ्काः(100)** **होरात्रयम्**

**विषयः-** **पाठनकालांशः**(पञ्चचत्वारिंशत्होरात्मकः)

**1. क्रियापदप्रयोगपरिचयः** **(पञ्चविंशतिहोरात्मकः)**

( **परस्मैपदी - आत्मनेपदी**)

**(क) लट्-लृट्-लोट्-लङ्-विधिलिङ्ग- धातुरूपाणि (प्रतिलकारं नवहोरात्मके विभज्य पाठनीयम्) ।**

**प्रचलितधातवः-**

यथा- अस्-कृ-भू-पठ-गम्-स्था-पा-दृश्-नी-लिख्-इष्-कथ-ज्ञ-ग्रह्-दा-श्रु-शक्-जागृ-शीङ्-याच्-मन्-एध्-पच्-दण्ड प्रभृतयः| (प्रतिधातु-एकहोरात्मकः)

वाक्यं यथा-(मोहनः करोति, करिष्यति, करोतु, अकरोत्, कुर्यात्) प्रभृतयः ।

**(ख) वाक्यनिर्माणम्** **(विंशतिहोरात्मकम्)**

लट्-लृट्-लोट्-लङ्-विधिलिङ्गेषु (प्रतिलकारं चतुर्होरात्मकम्)

**संदर्भग्रन्थाः-(सुगमधातुरूपावली, लघुसिद्धान्तकौमुद्याः कारकप्रकरणम्, रचनानुवादकौमुदी)|**

# तृतीयं प्रश्नपत्रम्

तृतीये प्रश्नपत्रे अव्ययवाचकाः संख्यावाचकाः, उपपदविभक्ति बोधकाः शब्दाः संभाषणप्रशिक्षणाय पाठनीयाः सन्ति, पाठनकाले कारकसूत्राण्यपि निर्दिष्टव्यानि | अभिनयद्वारा वस्तुप्रदर्श्य, ऑनलाईन माध्यमेन यथासम्भवं चित्रादिकं संकलय्य सरलविधिना च  वाक्यनिमार्णं कृत्वा पाठनीयम् मध्ये-मध्ये पूर्वाभ्यासोऽपि प्रशिक्षकैः कारणीयः |

**तृतीयं प्रश्नपत्रम्** **पूर्णाङ्काः(100)** **होरात्रयम्**

**विषयः-** **पाठनकालांशः(पञ्चचत्वारिंशद्धोरात्मकः)**

**1. अव्ययसंख्यावाचकप्रयोगः** **(षड्विंशतिहोरात्मकः)**

(क) अव्ययशब्दाः । (अष्टहोरात्मकाः)

स्थान-काल-प्रकार-समुच्चय-संबन्ध-परिणाम-निषेध-स्वीकार वाचक शब्दाः (एकैकहोरात्मकाः)

(ख) संख्याशब्दाः । (अष्टहोरात्मकाः)

वचन-लिङ्ग-रूप प्रत्ययानुगुणम् (प्रति विषयं द्विहोरात्मकम्)

(ग) उपपदविभक्तिबोधकाः शब्दाः । (दशहोरात्मकाः)

योगे विभक्तिः (पञ्चहोरात्मिका)

अर्थबोधः (पञ्चहोरात्मकः)

यथा- सह, नमः, अभितः, परितः, बिना प्रभृतयः ।

**2. वाक्यनिर्माणं** **(एकोन्विंशतिहोरात्मकम्)**

अव्ययेन ( पञ्चहोरात्मकम्)

संख्यया (पञ्चहोरात्मकम्)

नमः प्रभृतिभिः (नवहोरात्मकम्)

संदर्भग्रन्थाः - लघुसिद्धान्तकौमुद्याः अव्ययप्रकरणम्, सिद्धान्तकौमुद्याः कारकप्रकरणम्, अन्ये अनुवादग्रन्थाः |

# चतुर्थं प्रश्नपत्रम्

अस्य पाठ्यक्रमस्य चतुर्थे प्रश्नपत्रे संधिनियमाः, समासप्रयोगः, श्लोक- सूक्ति- कथा प्रभृतयः संस्कृतसंभाषणकौशलवर्धनाय संयोजिताः वर्तन्ते | अस्य पाठ्यक्रमस्य संस्कृतभाषा-सम्भाषणं मुख्यम् उद्देश्यम् विद्यते। तस्मात् प्रशिक्षकैः संवादशैल्या निर्धारिताः समयानुगुणं पाठविन्दवः पाठनीयाः।

## चतुर्थं प्रश्नपत्रम् पूर्णाङ्काः(100) होरात्रयम्

**विषयः-** **पाठनकालांशः(पञ्चचत्वारिंशत्होरात्मकः)**

### 1.संधिसमासप्रयोगपरिचयः (पञ्चविंशतिहोरात्मकः)

| | | | |
|---|---|---|---|
| (क) | अच्सन्धिः (यण्-अयादि-गुण- दीर्घ-वृद्धि-पूर्वरुप-पररूपम्) | (प्रतिसंधि एकहोरात्मकः) | पञ्चहोरात्मकः |
| (ख) | हल्सन्धिः (श्चुत्वम्, ष्टुत्वम्, अनुस्वारः,छत्वम्-परसवर्णः) | (प्रतिसंधि एकहोरात्मकः) | पञ्चहोरात्मकः |
| (ग) | विसर्गसन्धिः(विसर्ग-सत्वम्-उत्वम्-लोपः-यत्वम्) | (प्रतिसंधि एकहोरात्मकः) | पञ्चहोरात्मकः |
| (घ) | समासः-(अव्ययीभावः, तत्पुरुषः, बहुब्रीहिः, द्वन्द्वः) | (प्रतिसमासं एकहोरात्मकम्) | पञ्चहोरात्मकः |

**विशेषः -वाक्ये समागतानां सन्धिसमासपदानां परिचयं कृत्वा भाषाभ्यासःकारणीयः ।**

### 2.वाक्यनिर्माणं- (पञ्चहोरात्मकम्)

**संधिशब्दैः** (प्रतिसंधिः-अर्धहोरात्मकम्)

**समासशब्दैः** (प्रति समासं अर्धहोरात्मकम्)

### 3.सम्भाषणदक्षता-कौशलम् (विंशतिहोरात्मकम्)

| | | | |
|---|---|---|---|
| (क) प्रचलितश्लोकमाध्यमेन | (चतुर्होरात्मकम्) | (घ) कथामाध्यमेन | (चतुर्होरात्मकम्) |
| (ख) सूक्तिवाक्यमाध्यमेन | (चतुर्होरात्मकम्) | (ङ) हास्यकर्णमाध्यमेन | (चतुर्होरात्मकम्) |
| (ग) प्रहेलिकामाध्यमेन | (चतुर्होरात्मकम्) | | |

**संदर्भग्रन्थाः-** लघुसिद्धान्तकौमुद्याः संधि-समासप्रकरणम्, चाणक्यनीतिः, पञ्चतंत्रम्, सूक्तिसंग्रहः |

`(इति सम्)

## 1. संस्कृत भाषा प्रशिक्षण

| | | | | |
|---|---|---|---|---|
| 1. | डॉ. मनमोहन तिवारी | एसोसिएट प्रोफेसर रज्जू भैय्या विश्वविद्यालय प्रयागराज | 8805095519 | manmohan03071973@gmail.com |
| 2. | डॉ. रत्नेश कुमार त्रिवेदी | विभागाध्यक्ष, व्याकरण विभाग श्री वामदेव सं.म.वि. बाँदा | 7355026272 | trivediratneshbhu@gmail.com |
| 3. | डॉ. सूर्यकान्त त्रिपाठी | सहायक आचार्य, संस्कृत विभाग दीनदयाल उपाध्याय गोरखपुर विश्वविद्यालय, गोरखपुर | 6393200449 | suryakanttripathi4@gmail.com |
| 4. | डॉ. विजेन्द्र कुमार आर्य | सहायक आचार्य, व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 8700156167 | vijendrakumararya@gmail.com |
| 5. | डॉ. महेश द्विवेदी | सहायक आचार्य, एकरसानन्द आ.स.म.वि. मैनपुरी | 942308402 | maheshd942@gmail.com |
| 6. | डॉ. प्रांगेश मिश्र | वेदान्त विभागाध्यक्ष श्री गोरखनाथ संस्कृत विद्यापीठ गोरखपुर | 8858861353 | prangeshkumarmishra@gmail.com |
| 7. | डॉ. शैलेन्द्र कमार दीक्षित | वेद विभागाध्यक्ष, वेद वेदांग सं.म.वि. वाराणसी | 8004246395 | sarvayansewakaghi@gmail.com |
| 8. | डॉ. श्यामलेश कुमार तिवारी | सहायक आचार्य, लखनऊ विश्वविद्यालय, लखनऊ | 9415303193 | shyamlesh78@gmail.com |
| 9. | डॉ. कुप्पा गुरु बिल्वेश | व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 9944412535 | ksgb.ssvv@gmail.com |
| 10. | श्री नितिन आर्य | सहायक आचार्य, व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 9599392955 | nitingpa1995@gmail.com |
| 11. | डॉ. रंजन लता | सहायक आचार्य, संस्कृत विभाग दीनयाल दयाल गोरखपुर वि.वि. गोरखपुर | 7906607153 | ranjanjnu13@gmail.com |
| 12. | डॉ. चन्द्रकान्त शुक्ल | सहायक आचार्य, राजकीय स्ना. म.वि. गणीनाथ, मऊ | 8318867067 | chandrakantsanskritam@gmail.com |
| 13. | डॉ. रितेश कुमार पाण्डेय | व्याकरण विभागाध्यक्ष आदर्श सं.म.वि.वृन्दावन, मथुरा | 936821090 | riteshpandey34@gmail.com |
| 14. | डॉ. मधुसूदन मिश्र | सहायक आचार्य, ज्योतिष विभाग, सं.सं.वि.वि., वाराणसी | 9005484655 | msmishraastrobhu@gmail.com |
| 15. | प्रो. चन्द्रकान्ता राय | संस्कृत विभागाध्यक्ष आर्य महिला पी.जी. कालेज, वाराणसी | 8299715803 | chandrakanta.vns@gmail.com |

# धन्यवादाः वितीर्यन्ते